# Vishṇu Sūktam

[Ṛk-Saṁhitā & Taittirīya Śhākhā]

ॐ विष्णोर्नुकं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजाꣳसियो ,
अस्कभायदुत्तरꣳ सधस्थं विचक्रमाणस्त्रेधोरुगायः ।

ॐ vish’ṇōr’nukaṁ’ vīr’yāṇip’ pra vōchañ’ ya[fp]’
pār’thivāni vimamē rajāgm’siyō ,
as’kabhāyadut’taragm’ sadhas’thaṁ’
vichak’ramāṇas’trēdhōrugāyaḥa ।

विष्णो रराटमसि विष्णोः पृष्ठमसि विष्णोः श्ञ्यप्त्रे स्थो विष्णोः स्यूरसि
विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥

vish’ṇō rarāṭamasi vish’ṇōō[fp]’ pṛsh’ṭhamasi
vish’ṇōśh’ śhñyap’trēēs’ sthō vish’ṇōs’ syūrasi
vish’ṇōōr’dhruvamasi vaish’ṇavamasi
vish’ṇavēt’ tvā ॥ [KYV TS 1-2-13-3]

तदस्य प्रियमभि पाथो , अश्याम् । नरो यत्र देवयवो मदन्ति ।

tadas’yap’ priyamabhi pāthō , aśh’yām ।
narō yat’ra dēvayavō madan’ti ।

उरुक्रमस्य स हि बन्धुरित्था । विष्णोः पदे परमे मध्व , उत्सः ।

uruk’ramas’ya sa hi ban’dhurit’thā ।
vish’ṇōō[fp]’ padē paramē madh’va , ut’saḥa । [KYV TB 2-4-6-2]

प्र तद्विष्णुः स्तवते वीर्याय । मृगो न भीमः कुचरो गिरिष्ठाः ।

pra tad’vish’ṇus’ stavatē vīr’yāya ।
mṛgō na bhīma[hk]’ kucharō girish’ṭhā-ḥa ।

यस्योरुषु त्रिषु विक्रमणेषु । अधिक्षियन्ति भुवनानि विश्वा ॥

yas'yōrushut' trishu vik'ramaṇēshu |

adhik'shiyan'ti bhuvanāni viśh'vāā || [KYV TB 2-4-3-4]

परो मात्रया तनुवा वृधान । न ते महित्वमन्वश्नुवन्ति ।

parō māt'rayā tanuvā vṛdhāna |

na tē mahit'vaman'vaśh'nuvan'ti |

उभे ते विद्म रजसी पृथिव्या विष्णो देव त्वम् । परमस्य वित्से॥

ubhē tē vid'ma rajasī pṛthiv'yā vish'ṇō dēvat' tvam |

paramas'ya vit'sē || [KYV TB 2-8-3-2]

विचक्रमे पृथिवीमेष , एताम् । क्षेत्राय विष्णुर्मनुषे दशस्यन् ।

vichak'ramē pṛthivīmēsha , ētām |

kshēt'rāya vish'ṇur'manushē daśhas'yan'ne |

ध्रुवासो , अस्य कीरयो जनासः । उरुक्षितिꣳ सुजनिमाचकार ।

dhruvāsō , as'ya kīrayō janāsaḥ |

uruk'shitigm' sujanimāchakāra |

त्रिर्देवः पृथिवीमेष , एताम् । विचक्रमे शतर्चसं महित्वा ।

trir'dēva[fp]' pṛthivīmēsha , ētām |

vichak'ramē śhatar'chasam' mahit'vā |

प्र विष्णुरस्तु तवसस्तवीयान् । त्वेषꣳ ह्यस्य स्थविरस्य नाम ॥

pra vish'ṇuras'tu tavasas'tavīyā-ne |

tvēshag'geh'yas'yas' sthaviras'ya nāma || [KYV TB 2-4-3-5]

www.sanvedanet

अतो॑ दे॒वा , अ॑वन्तु॒नो॒ यतो॒ विष्णु॑र्विचक्र॒मे । पृ॒थि॒व्याः स॒प्त धाम॑भिः ॥
atōō dēvā , avan’tunō yatō viṣh’ṇur’r’vichak’ramē ।
pṛthiv’yās’ sap’ta dhāmabhiḥi ॥ [RV S 1-22-16]

इ॒दं विष्णु॒र्वि च॑क्रमे त्रे॒धा नि द॑धे प॒दम् । समू॑ढमस्य पाꣳसु॒रे ॥
idaṁ’ viṣh’ṇur’vi chak’ramēt’ trēdhā ni dadhē padam ।
samūḍhamas’ya pāgm’surē ॥ [KYV TS 1-2-13-1&2] [RV S 1-22-17]

त्रीणि॑ प॒दा वि च॑क्रमे॒ विष्णु॒र्गो॑पा , अदा॑भ्यः । त॒तो धर्मा॑णि धा॒रय॑न् ॥
trīṇi padā vi chak’ramē viṣh’ṇur’gōpā , adāābh’yaḥa ।
tatō dhar’māṇi dhārayan’ne ॥ [KYV TB 2-4-6-1] [RV S 1-22-18]

विष्णो॒ः कर्मा॑णि पश्यत॒ यतो॑ व्र॒तानि॑ प॒स्पशे । इन्द्र॑स्य॒ युज्यः॒ सखा॑ ॥
viṣh’ṇō[hk]’ kar’māṇi paśh’yata yatōōv’
vratāni pas’paśhē ।
in’dras’ya yuj’yas’ sakhāā ॥ [KYV TS 1-3-6-2] [RV S 1-22-19]

तद् विष्णोः॑ पर॒मं प॒दꣳ सदा॑ पश्यन्ति सू॒रयः॑ । दि॒वीव॒ चक्षु॒रात॑तम् ॥
tad’ viṣh’ṇōō[fp]’ paramam’ padagm’
sadā paśh’yan’ti sūrayaḥa ।
divīva chak’ṣhurātatam ॥ [KYV TS 1-3-6-2] [RV S 1-22-20]

तद् विप्रा॑सो विप॒न्यवो॑ जागृ॒वांसः॒ समि॑न्धते । विष्णो॒र्यत् प॑र॒मं प॒दम् ॥
tad’ vip’rāāsō vipan’yavōō
jāgṛvāṁ’sas’ samin’n’dhatē ।
viṣh’ṇōr’yat’ paramam’ padam ॥ [RV S 1-22-21]

www.SaiVeda.net

पर्या᳚प्त्या॒ , अन॑न्तरायाय॒ सर्व॑स्तोमोऽतिरा॒त्र ,
उ॑त्त॒मम॑ह॑र्भवति॒ सर्व॒स्याऽऽप्त्यै॒ सर्व॑स्य॒ जित्यै॒ सर्व॑मे॒व
तेना᳚ऽऽप्नोति॒ सर्वं᳚ जयति ॥

par'yāāp'tyā , anan'tarāyāya sar'vas'tōmō (a)tirāt'ra ,
ut'tamamahar'bhavati sar'vas'yā (ā)p'tyai
sar'vas'ya jit'yai sar'vamēva
tēnāā (ā)p'nōti sar'vañ' jayati ॥ [KYV TS 5-4-12-3]

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

www Sai Veda net